हिमचन्दनकुन्देन्दुकुमुदांभोजसन्निभं सरस्वतीं नमस्कृत्य क्रियते बालबोधनी १ नमस्कृ
त्य गणाधीशं मिहिरं देवमीश्वरम् गोविंदं परमानंदं प्रकरोमि षट्कारकम् २ प्रणम्य शंकरं नाथं त्रिदिशानां जगद्गुरुं कि
यते क्रियते यत्नादेषा बालबोधनी ३ क्रियाकारकसंबंधं येन जानाति मानवाः एभिः सह तेनुल्याः खरशृंगविवर्जि
ता ४ षट्कारकाणि कथ्यंते संबंधसहितानि वै यथा विज्ञानमात्रेण संस्कृतं जायते ध्रुवम् ५ कानि पुनस्तानि षट्कार
काणि कर्त्ता कर्म करणं संप्रदानं अपादानं अधिकरणं इति षट्कारकाणि ननु संबंधस्य कारकत्वं नास्ति क्रियायोगाभावा कथ्यं २
त् क्रिया प्रकृतिप्रत्ययादिसंवलितस्य धातोरर्थो यः क्रिया भवति यजति खादति जीवति प
चति पठतीत्यादि ॥ किं पुनः कारकं क्रियायाः साधकं कारकं कारकं साधकं क्रिया साध्या अय
मेव साध्यसाधकभावः क्रियाकारकसंबंधः तत्र क्रियाकारकसंबंधाभावात् यथा संबंधस्य
कारकत्वं नास्ति तथोच्यते साधोर्द्धनं तिष्ठतीत्यत्र धनस्य स्थितिः क्रियायाः कर्तृसंबंधो न
तु साधोस्तेन तस्य संबंधस्य साधकत्वाभावात्कारकत्वं नास्ति यः करोति स कर्त्ता यत्क्रियते त
त्कर्म येन क्रियते तत्करणं यस्मै दीयते तत्संप्रदानं यस्मादागच्छति बिभेति उत्तिष्ठते प्रल वर्तते २
वते श्रोतर्द्धते तदपादानं यस्य धनादिकं स संबंधः यस्मिन्स्थीयते तदधिकरणं ॥ इति सप्तवि
भक्त्यवतरः ॥ तत्र पंचविधः कर्त्ता कर्म सप्तविधं भवेत् करणं द्विविधं चैव संप्रदानं त्रिधा

श्रीताः कृतः समासो वा भवेद्यत्र स उक्तः प्रथमा ततः ॥ अथानभिहितकर्ता यथा ॥ एवं क्रियते श्राद्धेन ॥ अस्यापि सत्वा
र्थः ॥ एषमभिहितं कर्म क्रियते कथा श्राद्धेनेत्यनभिहितस्वतंत्रकर्तरि तृतीया एवं श्रीप्राप्यते दक्षैः विद्या उपास्य
ते सुकृतिभिः इत्यादि रच्यते विष्णुश्रूरेण काष्ठया भाषते चंद्रेण गम्यते श्रोतव्ये द्वारिकायां हरिणा इत्यादि तेषामेव
धातूनां लः कर्मणि चेत्यादिना कर्मणि भावे च लकारो भवति तदानभिहितस्वतंत्रकर्तरि कर्तृकरणयोस्तृतीयेति
तृतीया विभक्तिर्भवति तदुक्तं यदा कर्मणि च भावे च विधीयंते लडादयः ॥ अनुक्तस्तु तदा कर्ता तृतीयां तत्र लिप्सि
ता ॥ अथ स्वतंत्रः कर्तेति कर्तृसंज्ञा भवति प्रयोजको च निर्वर्तको च कारकाणां च ईश्वरः ॥ अस्वतंत्रकर्ता यथा इत्यु
क्तमिदाहिह्ना [illegible] हेतुकर्ता यथा ॥ अभिहितहेतुकर्ता ॥ अनभिहितहेतुकर्ता चेति तत्राभिहितहेतुकर्ता
यथा हितं लभंते विनीता तान् विनीतान् हितं लभमानान् बोधीरः प्रयुंक्ते स हितं लभयति विनीतान्
धीरः धीरः वेदितो विनयज्ञान प्रकृवान् हितमभीष्टं प्रापयती [illegible] हितमभिहितं कर्म लभ
यती क्रिया विनीतान् कर्तृकर्म धीरो हेतुकर्ता यथा गच्छति गृहं शिष्यः गमयति शिष्यं गृहं पिता
तथा ॥ अवगच्छति शास्त्रार्थं शिष्यः ॥ अवगमयति शास्त्रार्थं शिष्यं गुरुः भुंक्ते ॥ अन्नं बालः भोजयति ॥ अन्नं बालं ३
पिता इत्यादि यदा णिपंता धातोर्लः कर्मणि चेत्यादिना कर्तृ [illegible] कापि विधीयंते तदा ॥ अभिहि

परस्मैपदि सकर्मसेट् आत्मनेपदि सकर्मक सेट परस्मैपदि अकर्मक अनिट्

मतं अपादानं द्विधा चैव तथाधारश्चतुर्विधः करोतीति कारकं सर्वं तत्स्वातं अविवक्षया॥

कर्ता यथा स्वतंत्रो द्विविधः अपि वहेतुर्द्विविधः एवञ्च कर्मकर्ता एक एव कर्ता पञ्चविधः

स्मृतः तत्र द्विविध स्वतंत्र कर्ता यथा अभिहित स्वतंत्र कर्ता अनभिहित स्वतंत्र कर्ता च तत्रा

भिहित स्वतंत्र कर्ता यथा उभयपदि अनिट् सकर्मक डुकृञ् करणे धातुः उदाहरणं कर्ता अतः अक्ष्मदादिकर्मः उ तया — कुलकरोति पाठ अ ४

दयति व ... रायमनभिहितं कर्म करोति कृया आद्य अभिहित स्वतंत्र कर्ता एवं पुराणं

कुरुते आङ्ः प्रियमाप्नुवंति दत्तः विद्यामुपासिते स कृतिनः राजते विश्वेश्वरः का ... शया मा — आत्मनेप दि सेट् अक र्मक ६

ति चंद्रो गगने द्योतते र्द्दीरिकायां हरिः इत्यादि दुकुरुक्करणे आप्लृ आप्तो उपपदेवं राजृ दीप्तो भादी

प्तो छुत दीप्तो तत्र धातवः सप्तधा भवंतिसेटः अनिट् सकर्मकाः अकर्मकाः परस्मैपदिनः आत्मने

सकर्मके — पदिनः उभयपदिनः तत्र लः कर्मणि च भावे वा कर्मकेभ्यः इति पदा वा सकर्मकाः अकर्मकानां कर्त्त

ये धातुभ्यो — रि लकारा भवंति तदा अभिहित स्वतंत्र कर्ता भवति तत्राभिहितस्य स्वतंत्र कर्तरि प्रातिपदिकार्थलिं

लकारः कर्तरि

गपरिमाण वचनमात्रे प्रथमेति प्रथमा विभक्तिर्भवति तदुक्तं यस्मिंनर्थे विधीयंते लकारास्त

वास्यु: अक

र्मकेभ्यो भावे कर्तरि च २

वा
लबो
ध
३

असकर्मक धातवो द्विधा भवंति कर्तृस्थक्रिया कर्मकृया तत्र ये कर्मस्थकृया पचत्या
दयस्तेषामेव धातूनां प्रयोगे कर्मवत्कर्मणा तुल्यक्रिया इत्यनेन यदा कर्तुः कर्मवद्भा
वो विधीयते तदा कर्तुः कर्मवद्भावाद्धातूनां यगात्मनेपदचिण्चिण्वद्भावा भवंति स्व
यमेव पच्यते ओदनं स्वयमेवालावि केदारः स्वयमेवाभेदि काष्ठं स्वयमेति तदुक्तं क
र्मस्थोऽस्यभावः स्यात्कर्मस्था च क्रिया यथा तस्य धातोः प्रयोगे तु कर्मकर्त्ता विधी
यते अथ कर्तृ कर्म सप्तविधं कर्म ईप्सितं कर्म अनीप्सितं कर्म ईप्सितानीप्सितं क
र्म अकथितं कर्म कर्तृकर्म अभिहितं कर्म अनभिहितं कर्म चेति इति सप्तवि
धं कर्म तत्र ईप्सितं कर्म द्विधा भवति अनुक्तेप्सितं उक्तेप्सितं कर्म चेति तत्रानु
क्तेप्सितं कर्म यथा द्वारिकां गच्छति हरिः मथुरां गच्छति गोपालः अयोध्यां च
रति श्रीरामः काशीमेति विश्वेश्वरः कुरुक्षेत्रं प्रतिष्ठते वैष्णव गंगाती
रं चरति चतुरः नारायणं व्रजते सुधीरित्यादि सर्वत्रोदाहरणे कर्मणि द्वितीया
कर्त्तव्या गम्लृ गतौ अज गतौ चर गतौ पद गतौ एषां धातूनां लः कर्मणि च ३

तद्धेतुकर्त्ता भवति तत्राभिहितहेतुकर्त्तरि उक्तन्यायेनाप्रातिपदिकार्थेत्यादिना प्रथमावि
भक्तिर्भवति अथानभिहितहेतुकर्त्ता यथा हितं लभते विनीतो धीरेण सहनार्थः हितमनभिहि
तकर्मः लभते क्रियाविनीता अभिहितकर्त्तृकर्म धीरेणेति अनभिहितहेतुकर्त्ता तत्रतृती
या एवं गम्यते गृहं शिशुपित्रा तथा अवगम्यते शास्त्रं शिष्यो गुरुणा भोज्यते अन्नं बालः
पित्रा इत्यादिना दुलभसूत्रप्रयोगस्य गतो भुजपालना व्यवहारयोः इत्यादि णिजन्ता
नां तु कर्मणि चेत्यादिना यत्र लकारा विधीयन्ते तदानभिहितहेतुकर्त्तरि कर्तृकर
णयोस्तृतीयेति तृतीया विभक्तिर्भवति उक्तं हि प्रवृत्तौ वा निवृत्तौ वा यः स्वतन्त्रं प्रयोज
येत् हेतुकर्त्ता भवेदेव उक्तानुक्तभिदा द्विधा एकविधः कर्मकर्त्ता यथा स्वयमेव पच्यते ओद
नः स्वयमेव भिद्यते काष्ठं स्वयमेव लूयते केदारः स्वयमेव छिद्यते प्राकृतमनः लेहः ओ
दनार्थतण्डुलमन्नं ओदनशब्देनोच्यते पाकानुकूलश्रमेदना नुकूलं काष्ठं लवनानु
कूलः केदारः छेदनानुकूलो लोकाः पाकादिक्रियायामोदनादयः कर्त्तुरनुकूला भवन्ति
अनायासेनैव कर्त्तुः पाकादयो जायन्ति अतोच्यते स्वयमेव पच्यते ओदनः इत्यादि न

४ आतकेन दारका इत्युक्तेप्सिततकर्मणि प्रथमा गम्यते गमनक्रियाहारितोति अनभिहितका
र्तरि तृतीया एवमन्यत्रापि धातूनां यदा लः कर्मणि चेत्यादिना कर्मणि लकारो भवति तदा उक्तेप्सिततकर्म भवति।
तत्रोक्तेप्सिततकर्मणि प्रातिपदिकेन प्रथमा विभक्ति भवति उक्तं हि सकर्मकाणां धातूनां यदा कर्मणि लादयः त का ३
उक्तेप्सिततकर्म प्रथमा तत्र निर्दिष्टानां कर्तुरीप्सिततमं कर्मेति कर्मणि द्वितीयेति द्वितीया विभक्तिर्भवति तदुक्तं कर्तु त
रीप्सिततमत्वेन यद्देयस्याद्दिवदित्ते तदीप्सिततमं कर्म उक्तानुक्तभेदाद् द्विधा द्विविधमनीप्सितकर्म यथा उक्तानीप्सि क
तकर्मः तत्रानुक्तानीप्सितं कर्म यथा विषं खादति क्रुद्धः कण्टके मर्दयति बालः पापं क
रोति दुर्बुद्धिः कल्याणमपि क्रुद्धधर्म प्रत्यपत्यपति पापकृद्भयः इत्यादि विषमनुक्ता
नीप्सितं कर्म खादयति क्रियाक्रुद्धः स्वतन्त्रकर्ता एवमन्यत्रापि उक्तानीप्सितं क
र्म यथा विषं खाद्यते क्रुद्धेन कण्टके मर्द्यते बालेन पापं क्रियते दुर्बुद्धिना इत्यादि।
विषमित्युक्तानीप्सितं कर्मणि प्रथमा खाद्यते क्रिया क्रुद्धेनेत्यनभिहित स्वतन्त्रकर्ता ए
त्रा वमन्यत्रापि तथा हि उक्तानीप्सितं कर्मः इति कर्मसंज्ञा खादभक्षणे मर्द मर्दने
डुकृञ् करणे एषां धातूनां लः कर्मणि चेत्यादिना यदा कर्तरि तदा याविधो यं
● तदानीप्सितं कर्म भवति अनुक्तानीप्सितकर्मणि द्वितीयेति द्वितीया विभक्ति

ञ्गेचाकर्मकेभ्यः इति यदा कर्त्तरि लकारा विधीयंते तदानुक्त ईप्सित कर्मणि गत्यर्थः
कर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनीति द्वितीया चतुर्थ्यौ भवतः एवं शास्त्रं गृह्णाति
सुकृति गंगोदकं स्पृशति पुण्यवान् पुरुषोत्तमं पश्यति धार्मिक नन्दुलसीं जिघ्रति ध
न्यः पुरुषोत्तमं स्वदते रसनाया प्राणं व्याहरति सुधीः पुष्पं गंधं जातिर्वा सुमणं पृथ्वीं विक्रा
मति स्वः मुक्ते सिंचति सुधीः पुरीषं त्यजति कूपे तैर्थिकः सुवर्णं स्पृश स्पर्शने दृशिर प्रे ५
क्षणे घ्रा गंधोपादाने अद भक्षणे हृञ् हरणे ग्रह उपादाने क्षिप विक्षेपे विधूर्वः
स्विच्छिरदने त्यज हानौ तथा धर्मं जानाति ज्ञः हरिं भावयति मनीषी दुर्विज्ञेयमपि
बुद्ध्यधर्ममदधाद् दारधीरित्यादि एतेषामन्येषां धातूनां यदा लः कर्मणि चेत्यादिना
कर्त्तरि लकारा भवंति तदानुक्ते ईप्सिते कर्मणि द्वितीया विभक्तिर्भवति तदुक्तं स
कर्मकाणां धातूनां यदि कर्त्तरि लादयः तदानुक्ते ईप्सितं कर्म द्वितीया तत्र कीर्त्तिता उ
क्तेप्सितं कर्म यथा द्वारिका गम्यते हरिणा मथुरा त्यज्यते गोपालेन अयोध्या श्रीय
ते रामेण काशी ईयते विश्वेश्वरेण वाराणशी व्रज्यते वृद्धेन पृथिवी व्रज्यते परि

का०
वा०
५

कर्मः मनुक्तेप्सितं कर्मः गोपालः स्वतंत्रकर्त्ता एवं राज्ञा मनुक्ताकथितं कर्मः सुवर्णम
नुक्तेप्सितं कर्मः याचते क्रिया भिक्षुकः स्वतंत्रकर्त्ता वृत मनुक्ताकथितं कर्म ग्रवस्त्राणिकु
या इत्यादि ॥ उक्ताकथितं कर्म यथा गौर्दुह्यते दुग्धं गोपालेन राज्ञा सुवर्णं याच्य
ते भिक्षुकेन । वज्रो वरुद्ध्यते गौः गोपालेन । गुरुः शास्त्रं पृच्छ्यते शिष्येण । शिष्यो धर्ममनुशिष्यते गुरुणा । पुत्रः शाहं
शास्त्रमपि पित्रा । दुह प्रपूर्णे । दुयाच्यायाञ्चायां । रुधिरावर्णे । प्रच्छ जीप्सायां । ब्रूञ् व्यक्तायां वाचि । शास
अनुशिष्टौ । एतेषां धातूनां यदा तः कर्मचेत्यादिना कर्मणि लकारो भवति । तदा उक्ताकथितकर्म भव
ति । तत्र उक्ताकथितकर्मणि उक्तन्यायेन प्रथमा विभक्तिर्भवति । सर्वत्राकथितं चेति । कर्मसंज्ञाक
र्मणि प्रथमा अकथितं कर्मणि उक्ते प्रथमा विभक्तिर्भवति । तदुक्तं । प्रधाने कर्मन्यभिधेये
लादीनांहि द्विकर्मकाणां अप्रधाने दुहादीनां ण्यंते कर्तुश्च कर्मणः । कर्तृकर्म द्विविधः उक्तकर्तृ
कर्म अनुक्तकर्तृकर्म । तत्रानुक्तकर्तृकर्मः तत्रानुक्तकर्तृकर्म यथा । गच्छति ग्रामं पथिकः ग
मयति ग्रामं पथिकं धनी बुद्ध्यते शास्त्रं शिष्यः बोधयति शास्त्रं शिष्यमुपाध्यायः अश्नात्यन्नं म
बालकः आशयति अन्नं बालकं पिता अधीते वेदं ब्रह्मचारी अध्यापयति वेदं ब्रह्मचारिणमुपा ५

मेब

र्भवति यदा तेषां धातूनां कर्मणि लकारा भवंति तदानुक्ता ईप्सितं कर्म भवति तस्मिनुक्ता
नीप्सिते कर्मणि उक्तान्यायेन प्रथमाविभक्तिर्भवति यदुक्तं यदा कर्तरि निष्ठत्वे यत्कर्मत्वे
न विवक्षते तदा चानीप्सितं कर्म उक्तानुक्तभेदाद् द्विधा तथा ह्युक्तं चानीप्सितं कर्मेति कर्म
संज्ञा ईप्सितानीप्सितं कर्म यथा पायसं भक्षयन् तत्पतितं रजोप्यभ्यवहरति कुमा
रः ग्रामं गच्छन् वृक्षमूलान्युपसर्पति [illegible]पश्यन् सः पश्यति पायसमीप्सितं कर्मः भक्ष
यन् कर्तृविशेषणं रजः ईप्सितानीप्सितं कर्मः तत्पतितं रजोविशेषणं अभ्यवहरति अभ्य
वहरति क्रिया कुमारः स्वतंत्रकर्ता रजसोऽनुक्तत्वात् अविदितत्वाद्वा अज्ञानेन भक्ष
णं यत्र तदनीप्सितं एवमन्यत्रापि तथा ह्युक्तं चानीप्सितं कर्मेति कर्मसंज्ञा द्वितीया
विभक्तिर्भवति अकथितं कर्म द्विविधः अनुक्ताकथितं कर्मः उक्ताकथितं कर्म चे।
ति अनुक्ताकथितं कर्म यथा गां दोग्धि दुग्धं गोपालः राजानं सुवर्णं याचते भिक्षु
कः वृक्षं मरुः एधि गां गोपालकः गुरुः शास्त्रं पृच्छति शिष्यः शिष्यं धर्मं ब्रूते आचार्यः
एवं शब्दं शास्ति पिता गामनुक्ताकथितं कर्मः दो[illegible]दोग्धि क्रिया दुग्धं अनुक्तेप्सितं

अज्ञानी मनसाभ्यंतरं करणेन तृतीया नारायणमीप्सितं कर्म स्मरति क्रिया स्वकर्ता ।
स्वतंत्रकर्ता । सर्वमन्योऽपि । बाह्येन यथा रथेन द्वारिकां गच्छति हरिः वृषभेण कैला
६
शं व्रजति शिवः ऐरावतेनामरावतीं प्रयाति विभुः अश्वेन ग्रामं व्रजति धनी कलशेन
जलं गृह्णाति गृहस्थः कुशेन संध्यां विदधाति ब्रह्मचारी फलेन स्वपोषं करोति व
नी दण्डेन सिद्धार्थं मटति सिद्धकः रथेनेति बाह्यकरणं तृतीया द्वारिकामीप्सि
तं कर्म गच्छति क्रिया हरिः स्वतंत्रकर्ता करणमिति
करणसंज्ञा कर्तृकरणयोस्तृतीयेति तृतीया विभक्तिर्भवति
प्रेरकं अनुमातिकं अनिराकर्तृकं चेति तत्र प्रेरकं यथा विष्णुस्त्रिभुवनं द
दाति बलिः विष्णवे प्रेरके संप्रदाने चतुर्थी त्रिभुवनमीप्सितं कर्म ददाति क्रिया ब
लिः स्वतंत्रकर्ता विप्राय गां ददाति स्वामिकः सविष्णुर्मह्यं त्रिभुवनं देहि
ति प्रेरकसंप्रदानकारकमुच्यते इति यथे फलमूलं ददा
६

ध्याय गृहे तिष्ठति गृहस्थः गृहे स्थापयति गृहस्थं विश्वेश्वरः इत्यादि उक्तक
र्तृ कर्म यथा गम्यते ग्रामं पथिको धनिना बोध्यते शास्त्रं शिष्य उपाध्यायेन आस्य
ते ग्रन्थं बालकः पित्रा अध्याप्यते वेदं ब्रह्मचारी उपाध्यायेन गृहे स्थाप्यते गृहस्थो
विश्वेश्वरेण इत्यादि गम्लृ गतौ बुध अवगमने ३ उ प्रच्छ यने अधि पूर्वः इङ् गति निवृत्तौ
वस निवासे एतेषां धातूनां हेतौ णिजन्तेषां द्वितीयादि भक्तिर्भवति यदा कर्मणि लकारो भवति प्र
योज्यादि कार्ये: इत्यादिना प्रथमा प्रथमादि भक्तिर्भवति गतिबुद्धि प्रत्यवसानार्थ शब्दकर्माकर्म
काणामणि कर्त्ता स णौ वा इति प्रत्येत स्य धातोः कर्त्तुरण्यन्ते कर्मसंज्ञा भवति करणं द्विविधं
यथा बाह्यमाभ्यंतरं च तत्र बाह्यं तत् शरीराद्भिन्नं तदन्यदाभ्यंतरं ततोऽभ्यन्तर बाह्यं तत्राभ्यं
तरं यथा मनसा नारायणं स्मरति इति कृष्णकृति बुद्ध्या ध्यायति वासुदेवं धन्यः चित्तेन वि
श्वेश्वरं ध्यायति धीरः आत्मनाऽऽत्मीन मपि मन्यते ज्ञानी मनसा द्रव्यं प्रार्थयति जनः बुद्ध्या
धनं चिंतयति लुब्धः चित्तेन स्त्रियं ध्यायति कामातुरः अहंकारेण विषयमपि मन्यते

ति ग्रामादागच्छतिपथिकः वृत्तादित्यचलतापादाने पंचमी चलतापादाने पंचमी पत्रकर्तृ पत
ति कृष्या एवमन्यत्रापि तदुक्तं अपाये यदुदासीनं चलं वा यदि वाचलं ध्रुवमेव तदावेश
ति तदापादानमुच्यते ध्रुवमपाये अपादानमिति अपादानसंज्ञा अपादाने पंचमीति
पंचमीविभक्तिर्भवति अथ चतुर्धा संबंधः स्वस्वामिकसंबंधः अवयवावयविसंबंधः
जन्यजनकसंबंधः स्थान्यादेशाश्च संबंधः तत्र स्वस्वामिकसंबंधो यथा राज्ञः स्वामि
कं पुरुषः साधोर्धनं ब्राह्मणस्य कुलं राज्ञो धरित्री विश्वेश्वरस्य काशी कृष्णस्य मथुरा
इत्यादि राज्ञः स्वामिकं संबंधे षष्ठी पुरुषः प्रथमा अवयवावयसंबंधो यथा उष्ट्रस्य ग्रीवा
करिणो हस्तः शिशुनो [illegible] लं पशोरवयवसंबंधे षष्ठी पादः प्रातिपदिकार्थे प्रथमा ज
नन्यजनकसंबंधो यथा पितुः पुत्रः मातुर्दुहिता गवां क्षीरं धेनोर्वत्सः पितुः जन्यजनक
संबंधे षष्ठी पुत्रः प्रथमा स्थान्यादेशसंबंधो यथा अस्तेर्भूः पादः पत ब्रुवो वचः अस्ते
रिति स्थानादेशासंबंधे षष्ठी भू इति प्रातिपदिकार्थे मात्रे निर्दिष्टे प्रथमा एवम

भि गृहस्थः भिक्षवे काय भिक्षां ददाति श्रद्धावान् काशीवासिने मठं ददाति स कृती इति अथ ये
अत्र माविक संप्रदाने चतुर्थी फलम् लमीप्सितं कर्म ददाति कृपालु गृहस्थः स्वतंत्र कर्त्ता इति
धिः फलम् लमनुमन्यते तेनानुमाविकमुच्यते अनिराकर्तृकं यथा निश्चेश्वराय पुष्पं
ददाति साधुः नारायणाय पुष्पं ददाति सज्जनः शिवाय विमलं जलं ददाति शैवः गंगायै पुष्पां
जलिं ददाति धार्मिकः इत्यादि नारायणाय निराकर्तृक संप्रदाने चतुर्थी पुष्पमीप्सितं
कर्म कृष्णाय ददाति क्रिया सज्जनाः स्वतंत्र कर्त्ता एवमन्यत्रापि स हि नारायणः पुष्पार्पणेन
प्रेरयति दीयमाने न स कश्चित् इत्यनिराकर्तृकमुच्यते सर्वत्र कर्मणा यमभिप्रैति
स संप्रदानसंज्ञा संप्रदाने चतुर्थी चतुर्थी विभक्तिर्भवति चलम
चले चेति तत्र चलं यथा धावतो धावात् पतितो ऽश्ववाहकः अपसरतो मेषाद् पसरति मेषः
तिः
२ गंगाश्रोतसः प्रसरति महाग्राहकः अश्वादिधावपत इत्यादि विशेषणं अथवा चलाया
दाने पंचमी
२
हकः कर्त्ता पतितः इति कर्तृविशेषणं एवमन्यत्रापि अचलं यथा वृक्षात्पत्रं पत

नीयादय· षट्विभक्तयो भवंति ॥ उक्तेकर्त्तरि प्रथमेव भवति · तथा यदा अकर्मकाणां धातूनां कर्त्तरि परस्मैपदं भवति · यदा कर्त्तृयुक्ते प्रथमेव भवति · काश्यांप्रभवति विश्वेश्वरः · यदा भावे तदा भूयते · विश्वेश्वरेण इत्या दि · यदा कर्मकाणां धातूनां कर्त्तरि तिवादीनवकं भवति · तदा उक्तेकर्त्तरि प्रथमा भवति · अनुक्ते कर्मभवति तत्र कर्मणि द्वितीया · अकर्मकापि धातवः सोपसर्गाः सकर्मका भवंति · यथा परिभवति भवं भवानीपति · पराभवति जनं जनार्द्दनः · अभिभवति रावणं श्रीरामः · यदा कर्मणि लकारः · उक्ते कर्मणि प्रथमा · अनुक्ते कर्त्तरि तृतीया · परिभूयते भवो भवानीपतिना · इत्यादि · अकर्मकस कर्मकधातूनां सर्वे षांपचलकारिसुबोधव्यं · कर्त्तरि उक्तानुक्ते विभक्तित्रयं · उक्ते प्रथमेव · अनुक्ते कर्त्तरि तृतीया षष्ठीच · तद्यथा · उक्ते विश्वेश्वरं काश्यां वसति · परस्मैपदीयं · उक्ते कर्त्तरि प्रथमा · यदा भावेल कारास्तदानुक्ते कर्त्तरि तृतीया · विश्वेश्वरेण काश्यांभूयते · यदा भावे कृत्यप्रत्यया भवंति · तदा कृत्यानां कर्त्तरि चे ति षष्ठीतृतीया · यत्तन्यतं कृपचेवे वके लिम रचभूयते भव्यां च भव्यातवेवक्कृत्या सप्रविद्सुद्यः विश्वेश्वरस्य काश्यां भव्यं · विश्वेश्वरेण काश्यां भव्यं · एव मन्यत्रापि उक्तानुक्ते कर्मणि च तस्रोविभक्तयो भवंति तद्यथा · उक्ते कर्मणि प्रथमा · यदा सकर्मकाणां धातूनां कर्मणि लकारा भवंति तदा उक्ते कर्म

न्यत्रापि सर्वत्रैकसंबंधमात्रेऽशेषे षष्ठीति षष्ठी विभक्तिर्भवति आधारस्त्रिप्रकारो हि दः॥ श्री
औपश्लेषिकः अभिव्यापकः वैषयिकः सामीपकं चेति औपश्लेषिकं यथा कटे शेते इति
विश्लेषः मथुरायां हरिर्वसति अयोध्यायां रामास्ते गृहे तिष्ठति गृहस्य काश्यामौ
पश्लेषिकाधारे सप्तमी तिष्ठतिक्रिया विशेषः कर्त्ता एवमन्यत्रापि वैषयिकं यथा
नभसि चंद्रो राजते वृंदावने हरिर्वसति जलेमत्स्या तिष्ठंति आकाशोवदिलं संतिन भसि इति षष्ठ्याधारे स
प्तमी चंद्रः कर्त्ता एवमन्यत्रापि अभिव्यापिकं यथा जगति विश्वेश्वरो वर्त्तते तिलेषु तैलं वर्त्तते द
ध्योसर्पीरास्ते जलेषु आत्मा वर्त्तते भूतेषु प्राणो वर्त्तते जगति अभिव्यापिकाधारे सप्तमी विश्वेश्वरः
कर्त्ता वर्त्ततेक्रिया एवमन्यत्रापि सामीपकं यथा गंगायां घोषः प्रतिवसति जलेति तत्र तिष्ठंति
गंगायां सामीपिकाधारे सप्तमी घोषः कर्त्ता प्रतिवसतिक्रिया सर्वत्राधारोऽधिकरणसंज्ञायां स
प्तमधिकरणे चेति सप्तमी विभक्तिर्भवति इति सप्तविभक्त्यवतरः अधुना विभक्तिनिर्णय उच्यते
विभक्तिश्च सुप् तिङ् विभक्ति उच्यते सुविति स्वादय एकविंसति प्रत्यया तिङिति तिप आदयः पदात्म
नेपदे द्वे तिवादिते आदि अष्टादश प्रत्ययाः अनभि [illegible] संख्यासे अनभिहिते अनुक्तेहि

८

कर्मकारणं यथा । काशी विश्वेश्वरस्य मता । आकाशं चंद्रस्य मातं गगनस्थस्य दीप्तं काशी आकाशं गग
ने इत्यादि । धारे क्तप्रत्ययो क्तत्वात्प्रथमैकवचनं । विश्वेश्वरस्य चंद्रस्य यौ तौ । अनुक्तत्वादधिकरणत्वाचि
न्हेति । अधिकरणे क्तस्य प्रयोगे कर्तरि अनुक्ते षष्ठी भवतीत्यादि । अधिकरणे क्तप्रत्ययः काश्यादिनामधि
करणानां समानाधिकरणत्वादि प्रयोगः । भक्तानां भजनं भक्तीनां यदाधिकरणे क्तप्रत्ययो भवति
तदा उक्ताधिकरणं भवति । यथा काशी विश्वेश्वरस्य भुक्ता । गृहे ब्राह्मणस्य भुक्तं । स्वदेशे रागास्तो भुक्ताः । का
शी गृह स्वदेशानां उक्ताधारे प्रथमा । विश्वेश्वरस्य ब्राह्मणरागानां पूर्वसूत्रेण षष्ठी भक्तादीनां काश्या
दिलिंगयोगाच्चवस्थानां गमप्रभृतीनां यदाधिकरणे क्तप्रत्ययो भवति तदा उक्ताधिकरणे प्रथमापि
भवति तद्यथा । मथुरा श्रीकृष्णस्य गता । वनं सर्पस्य सृतं । पर्वतो रामस्य व्रजः प्रि । मथुरादे उक्ताधिकरणे
प्रथमा श्रीकृष्णादेः पूर्ववत् षष्ठी गतादेरधिकरणलिंगता उक्ताधिकरणे ज्ञेया गति प्रत्ययः समानार्थे भ
इत्याधिकरणे क्तप्रत्ययो भवति इत्यसुप्विभक्त्यवतरः । इदानीमुपपदविभक्तयो निरूप्यन्ते । यस्य मध्ये
इत्यर्थे द्वितीया । काशीमंतरा विश्वेश्वरो वर्तते । काशीमध्ये वर्तत इत्यर्थः । अयोध्यामंतरेण सरयो भ
वति । अयोध्यामध्ये भातीत्यर्थः । अन्तरान्तरेण युक्ते इति सूत्रार्थे द्वितीया विभक्तिर्भवति । यथा

८

णि प्रथमा विभक्तिर्भवति व रिभूयन्ते राव णोराघवेण अनुक्तो द्वितीया चतुर्थी षष्ठी यदा सकर्मकाणां धातूनां
कर्तृत्वादयो विधीयन्ते उक्ता कर्तरि प्रथमा अनुक्ते कर्मणि द्वितीया काशींयाति विश्वेश्वरः इत्यादि गत्य
र्थकर्मणि द्वितीया च चतुर्थी भवतः अनुक्ते मथुरां गच्छति हरिः मथुरायै गच्छति हरि रित्यादि यदा सकर्मण
द्यर्थानां कर्तरि लादयो भवन्ति तदा उक्ते कर्मणि षष्ठी भवति रामस्य रति सुकृतिरित्यादि यदा कर्मका
णां धातूनां लादयो भवन्ति तदानुक्ते कर्मणि कर्तृ कर्मणोः कृति षष्ठी भवति अयोध्यायां गतो रामः अयोध्या
यागमितिरामः इत्यादि करणे प्रथमा तृतीया षष्ठी च छेदनः खड्गो देहस्य छेदनमिति करणानुक्तेषु येन
उक्तेन प्रथमा कर्तृकरणयोः कृतीति कर्मणि देहस्य अनुक्ते करणे तृतीया यदा धातूनां सर्वेषां कर्तृत्वेऽि
र्म भावेषु लादयो भवन्ति तदानुक्ते करणे भवति रथेन अयोध्यां याति रामचंद्रः मनसा भव्यते हरिः पंक्ति
भिः तेजसा काशं हरो दीप्यते इत्यादि सर्वत्र कर्तृ करणयोः तृतीया करणे षष्ठी यथा ज्ञानस्य ज्ञाना ति बुद्धः
पक्वस्य भानी तेदुर्जनः प्रवर्त्तत इत्यर्थः संप्रदाने चतुर्थी विप्राय धर्मं ददाति अपादाने पंचमी
वृक्षात्पत्रं पतति संबंधे षष्ठी द्वितीया च राजपुरुषः ग्राममन्तरे विश्वेश्वरः आधारे प्रथमा द्वितीया
सप्तमी च अकर्मक गत्यर्थ भक्षणार्थानां यदाधारोक्तप्रत्ययो भवति तदाधारे प्रथमा भवति तत्रा

१०

मः पुमान् चिनोति नानावृक्षान् पुष्पं चिनोतीति पृथक्शब्देन कार्यः विनानानाभिन्नतीयान्यतरस्यामिति त
तीयापंचम्यौ भवतः यस्मिन्नन्यस्य कार्यं भवति तत्र सप्तमीविभक्तिर्भवति तद्यथा गोषु दुह्यमानासु दुग्धास्वाग
तः नारायणस्मरणे सति सर्वपापक्षयो भवति ईश्वरे भक्तिमति दरिद्रो भजत इत्यादि यस्य च भावेन भा
वलक्षणमिति सप्तमी विभक्तिर्भवति यस्मात्पृथक् क्रियते तत्र षष्ठीसप्तम्यौ भवतः नराणां मध्ये गोसंपन्न
दीर्घवती गोषु मध्ये कृष्णा गौः संपन्नक्षीरतमा मनुष्येषु मध्ये ब्राह्मणो धार्मिकः मनुष्याणां वा ब्रा
ह्मणानां मध्ये कृष्यावंतः ब्राह्मणेषु वा यतश्च निर्धारणमिति षष्ठीसप्तम्यौ भवतः इदानीं कृदन्तयोगे षष्ठी ने
कृद्योगे षष्ठी यथा कार्यस्य कर्त्ता कृती कार्यः स्वकारके स एव वाक्यस्य कर्त्ता साधकः वाक्यस्य वाक्य
साधारित्यादि वाक्यस्येति कर्मणि षष्ठी वक्ते ति कृया सिद्धक्रियावाचकः साधारिति कर्त्ता एवं कार्य
स्येति चानुक्ते कर्मणि षष्ठी कारक इति कृत्प्रत्ययान्तः सिद्धक्रियावाचकः एतस्यामहन्तकर्त्ता सर्वे सर्वेषां
धातूनां सकर्मकाणां यदा कर्त्तरि कृत्तो भवति तदानुक्ते षष्ठी यदा भावे कृत्तो भवति तदानुक्ते कर्त्तरि
षष्ठी त्रिजगति श्रीविष्णोः स्वभावः सर्वत्र हरेर्जयः त्रिजगतां धारे सप्तमी श्रीविष्णोः स्वस्य स्वान्य
न्यामिति तत्कर्त्तरि षष्ठी भावे इति कृत्त एवं सर्वे तेषां यदा हरेरिति अनभिहिते कर्त्तरि षष्ठी जग

१०

कर्म करोति तत्र द्वितीया तद्यथा सर्वरात्रं पठति ब्राह्मणः दासमपि रात्रिं न विरम्य पठतीत्यर्थः पञ्चक्रोशं काशी
वर्त्तते सर्वतः क्रोशपंचकं व्याप्य काशीति स्मृतीत्यर्थः कालाध्वनोरत्यन्तसंयोग इति कालाध्वनोर्द्वितीया विभ
क्तिर्भवति मासमधीते क्रोशं पर्वतः यस्मै नमस्करोमि इति चतुर्थी तद्यथा श्रीविश्वेश्वराय नमः श्रीना
रायणाय नमः गोभ्यो नमः नमः स्वस्तिस्वाहावषड्योगे चतुर्थी विभक्तिर्भवति यस्मादन्यः यस्मादन्या
ने यस्मादितरः यस्माद्दृते यस्मात्पूर्वादिदिगित्यादि पञ्चमी तद्यथा श्रीविश्वेश्वरादन्यो नेश्वरः ब्राह्मणा
दन्यः क्षत्रियः क्षत्रियादन्यो वैश्यः वैश्यादन्यः शूद्रः इत्यादि श्रीविश्वेश्वरस्य गृहाद्दरात्मस्ति कर्णिकाश्रा
रात्समीप इत्यर्थः मथुराया आरात्काशी मथुराया दूर इत्यर्थः गंगाया ऋते नान्यो मुक्त्यै न भवंति शि
वपूजना दृते मुक्तिर्नास्ति पूजनं विनेत्यर्थः काश्याः पूर्वं गंगा भवति काश्या दक्षिणस्य श्रीवर्त्तते काश्याप
श्चिमे भीमचण्डीति कूटः काश्याः उत्तरे वरणास्ति एवं धामो परे प्रत्यया भवंति अन्यारादितरर्त्तेदि
क्शब्दाञ्चूत्तरपदाजाहियुक्ते इति पञ्चमी विभक्तिर्भवति यस्मात्पृथक् यस्माद्विना पृथग्विनानानाभिस्तृतीयापञ्चम्यौ
भवतः चंद्रेण पृथक् रात्री न शोभते सूर्येण पृथक् दिवा न भाति हर्षवर्णेन पृथक् कर्म न शोभते वा
दित्येन विना वासौ न भाति सपुत्रेण विना कुलं न राजते इत्यादि एतेषां पंचमी चंद्रादित्यर्थः नानावृत्ते

नभवितुं गतो विप्रः भीतो गणमुत्र पोनः पुनेऽभ्यसीतो भवतः काशीमावं भावं सर्वं युक्तयो भवति सदृशः वात
कार्याणां प्रयोगे तृतीया षष्ठ्यौ भवतः तद्यथा नारायणेन सदृशः सविता नारायणस्य सदृशः स
वितेति विप्रेण तुल्यः क्षत्रियः विप्रस्य तुल्यो निवा गुरुणा समः शिष्यः गुरोः समः इति वा अन्यतर
स्यांति तृतीया षष्ठ्यौ भवतः यस्मै कुशलं यस्मै सुखं यस्मै हितं तत्र चतुर्थी षष्ठ्यौ भवतः तद्यथा
ब्राह्मणाय कुशलं भवति ब्राह्मणस्य कुशलं भवतात् ब्राह्मणाय हितं भवतु पते षष्ठी ब्राह्मणस्य वेत्या
दि गोभ्यः कुशलमस्तु गवां कुशलं स्यात् सुखमस्तु गोभ्यः गवां सुखमस्तु गोभ्यो हितं भूयात् ग
वां हितं भूयात् सर्वत्र चतुर्थी शिष्य सुखमस्तु कुशलेन सह पुत्राः हितेति चतुर्थी षष्ठ्यौ भवतः
ति ब का क कृ स पूर्णाः शुभं भूयात् ॥ संवत् १८२० आषाढे शुक्ल पदे तनु पूर्णिमा
शुक्रवासरे ॥ लिखितं मे यारामेण इदं वैयु अपुस्तकं यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ ९ ३ ३ ३ ३ ९ ९ ९ ७ ७ ७ ७ ३ ३ ३ ३

यदितिकृत्य · एवंजित्य · भावेऽर्थ तत्कर्मसिद्धकृयापरमन्येषां सकर्मकाणां यदा भावे कृतः तदाऽनुक्तकर्त्ता भवति · उभयत्र कर्त्तरि
कर्मणो कृति षष्ठी भवति · शानशानच् कसुकानसः कृतो वक्तुनां प्रयोगे कर्त्तरि कर्मणो · तृणीकृतीति षष्ठीनिषेधो भ
वति · विश्वेश्वरं पश्यन् नरो मुक्तो भवति · रावणं पराक्रममाने रामचंद्रः · प्रकाशयते वेदं प्रभुवान् ब्राह्मणो भाति
धर्मंकरिष्यन् जनः पुराशुयी भवति · धर्मंकरिष्यमाणो लोकाः कदा भवति · हरिस्मतो जनो भवति द्विषः हरिं
भावयन् पुत्रानात्मानमपुंपत् · रत्नत्रसर्वत्र कोकाध्ययनिमा खलर्थतृणामिति षष्ठीनिषेधः कृत्ययोगे कर्त्तृप
दे षष्ठी · तद्यथा पातव्यस्तकृतंचैव केलिपरमनीवरम भव्यांचमव्यतचैव कृत्याम्नपुचिद्धृविधा · तयोरेव कृ
त्याखलार्थाः इति सकर्मकाणां धातूनां कर्मणि कृत्या भवंति · तदानुक्ते कर्त्तरि तृतीया षष्ठ्यौ भवतः धार्मिके
ण द्रष्टव्यो विश्वेश्वरः धार्मिकस्य द्रष्टव्यो विश्वेश्वरः धार्मिकस्य द्रष्टव्या काशी धार्मिकेण वा · धार्मिकेण द्रष्टव्यं तीर्थं धा
र्मिकस्य वा · एवं द्रष्टव्यो दर्शनीयश्च · अकर्मकाणां धातूनां भावे कृत्या भवंति · तदानुक्ते कर्त्तरि तृती... ष
ष्ठी भवति · ब्राह्मणेन काश्यां भव्यं · ब्राह्मणस्य वा · ब्राह्मणेन भवितव्यं काश्यां · ब्राह्मणस्य वा · ब्राह्मणेन का
श्यां भवनीयं ब्राह्मणस्य वा · सर्वत्र कृत्यानां कर्त्तरि तृतीया षष्ठ्यौ भवतः · अव्यये कृतवक्तव्यो भवति · भावे
त्रयः अमी तदापेक्षकः तद्यथा पूर्वकाले क्त्वा क्तप्रत्ययान्तो ब्राह्मणः सूयते वटं गत्वा ब्राह्मणा भावे तुम्